# Shri Hayagriva Mangalam

# શ્રીહયગ્રીવમઙ્ગલમ્

## Document Information

Text title : Hayagriva Mangalam

File name : hayagrIvamangalam.itx

Category : vishhnu, aShTaka, mangala

Location : doc_vishhnu

Transliterated by : Chandrasekhar Karumuri

Proofread by : Chandrasekhar Karumuri

Latest update : August 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# Shri Hayagriva Mangalam

# શ્રીહયગ્રીવમઙ્ગલમ્

મઙ્ગલં શ્રીહયાસ્યાય વેદાહરણકર્મણે ।
પ્રણવોદ્ગીતવપુષે હયગ્રીવાય મઙ્ગલમ્ ॥ ૧॥

ચતુઃષષ્ટિકલાધીશ! વિશ્વરૂપ! હયાનન!।
મહાર્ણવામ્બુપર્યઙ્ક! વિષ્ણવે તેઽસ્તુ મઙ્ગલમ્ ॥ ૨॥

અનિરુદ્ધાય સૌમ્યાય વેદભર્ત્રે સનાતન! ।
શ્રીદાય શ્રીમયાયાસ્તુ મઙ્ગલં સ્વામિને તવ ॥ ૩॥

ભદ્રશ્રીવત્સહારાઢ્ય! પઞ્ચરાત્રપ્રવર્તક!।
ભક્તાત્મભાવભવન! મઙ્ગલં તેઽસ્તુ મુક્તિદ ॥ ૪॥

સર્વકર્મસમારાધ્ય! પૂર્ણષાડ્ગુણ્યવિગ્રહ!।
શ્રિયા ગાઢોપગૂઢાત્મન્! મઙ્ગલં તે હયાનન!॥ ૫॥

અઙ્કેનોદૂહ્ય વાગ્દેવીમાચાર્યકમુપાશ્રિત!।
મઙ્ગલં તેઽસ્તુ વાગીશ! શ્રીનિધે! શ્રીનિકેતન ॥ ૬॥

સ્વરાજે ચ વિરાજે ચ સંરાજે તે હયાનન!।
વેદકર્ત્રે વેદભર્ત્રે વેદહર્ત્રેઽસ્તુ મઙ્ગલમ્ ॥ ૭॥

ક્ષમાસારાય હરયે દયાઘન! હયાનન!।
વેદવેદાન્તવેદ્યાય સર્વદા તવ મઙ્ગલમ્ ॥ ૮॥

શ્રીરઙ્ગનાથેન ભક્તેન હયગ્રીવસ્ય મઙ્ગલમ્ ।
રચિતં પ્રીતયે તસ્ય ભૂયાત્ સર્વત્ર મઙ્ગલમ્ ॥ ૯॥

ઇતિ શ્રીહયગ્રીવમઙ્ગલં સમ્પૂર્ણમ્ ।

Proofread by Chandrasekhar Karumuri

*Shri Hayagriva Mangalam*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*